श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवाधूलवरदनारायणगुरुभिः अनुगृहीता

# ॥ श्री पराङ्कुशपञ्चविंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पराङ्कुशपञ्चविंशतिः ॥

श्रीपराङ्कुशनुतिं य आतनोत्
तत्पदाब्जपरभक्तिचोदितः।
तं वधूलकुलभूषणं दया -
वारिधिं वरददेशिकं भजे ॥

श्रीमन् पराङ्कुशनिरङ्कुशतत्त्वबोध
वात्सल्यपूर्णकरुणापरिणामरूप।
सौशील्यसागरमनन्तगुणाकरं त्वां
संसारतापहरणं शरणं वृणेहम् ॥ 1 ॥

कासारसंयमिमुखाः कमलासहाय -
भक्ताः प्रपत्तिपदवीनियता महान्तः।
यस्याभवन्नवयवा इव पारतन्त्र्यात्
तस्मै नमो वकुळभूषणदेशिकाय ॥ 2 ॥

श्रीरङ्गराजपदपङ्कजसङ्गशीलं
श्रेयःपरं मधुरपूर्वकवेरपूर्वम्।
नाथार्ययामुनयतीश्वरभागधेयं
नाथं कुलस्य मम नौमि पराङ्कुशार्यम् ॥ 3 ॥

पापक्रियासु निरताः शृणुतास्मदुक्तिं
तापत्रयेण भविनः परितप्यमानाः।
आपद्धनं मधुरिपोर्भवतामविद्या
स्वापप्रहाणनिपुणः शरणं शठारिः ॥ 4 ॥

नित्योथ मुक्त उत तद्गुणको मुमुक्षुः
व्यासादिवद्भगवता किमनुप्रविष्टः।
अत्र्यादिसूनुरिह वर्णयुगक्रमात् किम्
आसीत्पुराणपुरुषः शठवैरियोगी ॥ 5 ॥

कर्मेति केचिदपरे मतिरित्यथान्ये
भक्तिं परे प्रपदनं प्रवदन्त्युपायम्।
आम्नायसारचतुरास्त्वमितानुभावं
त्वामेव यान्ति शरणं शठजिन्मुनीन्द्र ॥ 6 ॥

भक्त्याद्युपायरहितः पतितो भवाब्धौ
त्वत्पादसेवनरसेपि च दुर्बलोऽहम्।
इत्थं सतीह शठकोप दयैकमूर्ते
कृत्यं किमस्ति मम संसृतिमोचनाय ॥ 7 ॥

त्वद्दिव्यसूक्तिपरिशीलनमात्रमेव
निःश्रेयसाधिगमने निरपेक्षहेतुः।
तच्चास्ति मे न शठवैरिगुरो महात्मन्
उज्जीवनं कथमहो मम जाघटीति ॥ 8 ॥

त्वन्नामकीर्तनमकृत्रिममातनोति
यस्तस्य संसरणनिस्तरणं घटेत।
दुर्वासनाकलुषितस्य न मेऽस्ति बुद्धिः
तत्रापि केसरविभूष किमात्मनीनम् ॥ 9 ॥

त्वत्किङ्करत्वरसिकाः तव दासदास -
दास्यैकरस्यमुदिताश्च भजन्ति मुक्तिम्।
तत्राप्यहं शकनवान् न शठारियोगिन्
अत्याहितं कथमपैतु भवोत्थितं मे ॥ 10 ॥

त्वद्विग्रहेक्षणमथो तव संस्मृतिश्च
मुक्त्यै भवेदिति वदन्ति पराङ्कुशार्य।
निद्राप्रमादमलिनीकृतमानसस्य
तत्रापि शक्तिरिह मे न कथं भवेयम्॥ **11** ॥

एवं कदाचिदपि कुत्रचिदस्त्युपायः
नैवाघनाशनविधौ मम तावकस्य।
आकस्मिकीं तव कृपामपहाय माया -
कोलाहलप्रशमनीं कुरुकापुरीश॥ **12** ॥

अव्याजबन्धुमविशेषमशेषजन्तोः
उद्वेलवत्सलतया कृपया च पूर्णम्।
त्वामामनन्ति शठवैरिमुने ततस्ते
हातुं न युक्तमपराधिनमप्यहो माम्॥ **13** ॥

यावच्च यच्च दुरितं सकलस्य जन्तोः
तावच्च तत्तदधिकञ्च ममास्ति सत्यम्।
एतद्वचः कथमभूत् सततानृतोक्ति -
शीलस्य मे शठरिपो तदिदं विचित्रम्॥ **14** ॥

शास्त्रेण यद्विहितमाचरणीयमेतत्
सर्वैर्निषिद्धमिह यत्तदुपेक्षणीयम्।
इत्यादिकं शठरिपो सदसि ब्रवीमि
हैं सन्तनोमि रहसि स्ववचोविरुद्धम्॥ **15** ॥

प्रच्छन्नपातकशतावृतचेतसो मे
संप्रीणिताः प्रणतिभूमिकया कयाचित्।
सत्कारमादरभरेण परावरज्ञाः
कुर्वन्ति हन्त शठवैरिमुने हतोऽस्मि॥ **16** ॥

पद्भ्यां शपे तव शठारिमुनीन्द्र योऽभूत्
उद्दामदोषगणनान्तिमकोटिनिष्ठः।
सोऽपि प्रकृष्टविभवो यदपेक्षया स्यात्
तस्माच्च पापभरितोऽहमितो न पापः॥ **17** ॥

पूर्वैः स्वनैच्यमनुसंहितमार्यवर्यैः
मामेव वीक्ष्य महतां न तदस्ति तेषाम्।
नैच्यं त्विदं शठरिपो मम सत्यमेव
मत्तः परो न मलिनो यत आविरस्ति॥ **18** ॥

उक्त्वा स्वदोषविषयं वचनं त्वदग्रे
संसारभीरुरिव तेन च वञ्चकोऽहम्।
सामर्थ्यमेव शठकोप विभावयामि
संवीक्ष्य कं गुणमिहासि मयि प्रसन्नः॥ **19** ॥

किन्तु क्रियासमभिहारकृतापराधः
हन्तानुतप्य पुनरप्यपराधकारी।
पद्मासखस्य परिहासरसोचितोऽहम्
एतद्विलोक्य शठकोप मयि प्रसीद॥ **20** ॥

कामप्रमोऽहमदमत्सरमन्युलोभैः
पारम्परीत उदितैः परिपीड्यमानम्।
दैवात्त्वदीक्षणपथं दयया शठारे
पाहि प्रपन्नमिममुन्नमदागसं माम्॥ **21** ॥

कार्या कृपा सुमतिभिः खलु दुःखितेषु
दुःखी मया न सदृशो भृशदुःखभाजाम्।
तस्मात्तवाखिलजनेषु च यानुकम्पा
मय्येव तां शठरिपो निभृतं निधेहि॥ **22** ॥

विश्वोपकारकमघार्णवतारकं त्वाम्
अप्राप्य हे शठरिपो हत एव पूर्वम्।
अद्य त्वदीयकृपया प्रतिलब्धसत्त्वः
त्वत्सेवनामृतरसेन सुखी भवानि ॥ 23 ॥

अत्राप्यमुत्र करणत्रितयप्रवृत्त्या
त्वत्पादपङ्कजजुषां विदुषां प्रसादम्।
नित्यं लभेमहि न चान्यदपेक्षितं नः
प्रत्यग्रकेसरपरिष्कृतकारिसूनो ॥ 24 ॥

वाधूलवेङ्कटपतिं वरदार्यसूनुम्
अस्मद्गुरुं तव पदप्रवणं समीक्ष्य।
अज्ञं कृतागसमनाथमकिञ्चनं मां
त्वत्किङ्करं शठरिपो सततं कुरुष्व ॥ 25 ॥

॥ श्री पराङ्कुशपञ्चविंशतिः समाप्ता ॥